# Yatiraja Bharati Stuti Padyani

# યતિરાજભારતીસ્તુતિપદ્યાનિ

## Document Information

Text title : Yatiraja Bharati Stuti Padyani

File name : yatirAjabhAratIstutipadyAni.itx

Category : deities_misc, stotra, gurudev

Location : doc_deities_misc

Proofread by : Aruna Narayanan

Description/comments : Ramanujastotraratnavali, Ramanuja Sampradaya. (Prayer to Shri Ramanujacharya)

Latest update : December 25, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2022

*sanskritdocuments.org*

# યતિરાજભારતીસ્તુતિપદ્યાનિ

॥ શ્રીઃ ॥

॥ શ્રીમતે રામાનુજાય નમઃ

॥ શ્રીમતે વાત્સ્યવરદદેશિકાય નમઃ ॥

શ્રીવાત્સ્યવરદગુરુભિરનુગૃહીતાનિ

॥ યતિરાજભારતીસ્તુતિપદ્યાનિ ॥

વન્દેઽહં વરદાર્યં તં વત્સાભિજનભૂષણમ્ ।
ભાષ્યામૃતપ્રદાનાદ્યઃ સઞ્જીવયતિ મામપિ ॥

ક્વ પથિ વિદુષામેષા પ્રૌઢી શ્રિયઃ પ્રભુણા શપે
મશકશકનં મન્યે માદૃક્પ્રભાવનિદર્શનમ્ ।
યતિવરવચસ્તેજઃ પ્રત્યર્થિવર્ગનિરર્ગલ
ક્ષપણનિપુણં નિત્યં જાગર્તિ કીર્તિકરં મયિ ॥ ૧॥

ન ખલુ કવિતામાનઃ કા નઃ ક્ષતિઃ પથિ ગૌતમે
ન ચ પરિચયઃ કાણાદે વા કુમારિલદર્શને ।
અપિ ગુરુમતે શાસ્ત્રેષ્વન્યેષ્વપીહ તથાઽપિ નઃ
ફલતિ વિજયં સર્વત્ર શ્રીયતીશ્વરગીશ્શ્રમઃ ॥ ૨॥

યશ્ચકાર યતિરાજભારતી-
ચિત્તવૃત્તિષુ પરં પરિશ્રમમ્ ।
તસ્ય વૈદિકસદશ્શિખામણેઃ
અગ્રતઃ ક્વ પરવાદિસમ્ભવઃ ॥ ૩॥

(શ્રીતત્ત્વસારે)

ઇતિ શ્રીવાત્સ્યવરદગુરુભિરનુગૃહીતાનિ યતિરાજભારતીસ્તુતિપદ્યાનિ સમાપ્તા ।

યદૃષ્ટ્યા નિગમાન્તદેશિકમણિઃ લક્ષ્મીહયાસ્યાસ્પદં

યદ્વંશ્યાશ્રયણાચ્છઠારિમુનિરાટ્ લક્ષ્મીનૃસિંહાસ્પદમ્ ।
યં દેવઃ કરિશૈલમૌલિનિલયઃ પ્રાહ સ્વયં માતરં
સઃ શ્રીવત્સગુરુઃ કરોતુ સતતં ભદ્રં સુભદ્રાકૃતિઃ ॥

॥ શ્રીમતે વાત્સ્યવરદદેશિકાય નમઃ ॥

Proofread by Aruna Narayanan

*Yatiraja Bharati Stuti Padyani*
pdf was typeset on December 25, 2022

Please send corrections to *sanskrit@cheerful.com*